# संस्कृतवार्ता:

दिनाङ्क :-21.03.2025

प्रात: - 06:55

अथ वार्ता:

प्रधानमन्त्री

प्रधानमन्त्री नरेन्द्रमोदी समुदीरितवान् यत् विकसितभारतस्य निर्माणार्थं ग्रामाणां विकास: प्रथमतया आवश्यको वर्तते इति। गुजरातराज्यस्य भरवाडसमाजेन सम्बद्धे बावलीयाली-धाम्न: कार्यक्रमावधौ दृश्यश्रव्यपरान्तर्जालीयमाध्यमेन श्रीमोदी सामूहिक प्रयासानां महत्वं प्रतिपादितवान् तथा च रक्तदुर्गत: स्ववक्तव्य पुनरावर्तितवान् यत् सर्वेषां प्रयास: देशस्यास्य महती शक्ति: विद्यते इति। असौ अग्रे आधुनिकताया: माध्यमेन समुदायस्य शक्तिकरणार्थं शिक्षाया: महत्त्वं प्रत्यपादयत्। अपि च भरवाड-समुदायस्य सेवा: प्रति समर्पणं प्रकृतिं प्रति प्रतिबद्धतां प्रशंसितवान्।

जयशङ्कर:

विदेशमन्त्री डॉ. एस्. जयशङ्कर: नवदिल्ल्यां स्वकीयया बोलिवियादेशीयया सहयोगिनया सेलिण्डा-सोसा-लुण्डा इत्यनया साकं द्विपक्षीय-सहयोगेषु व्यापकीं चर्चां समनुष्ठितवान्। अत्रावसरे उभौ पक्षौ तात्कालिकप्रभाव परियोजनासु एकस्मिन् सन्धिपत्रे हस्ताक्षरमपि कृतवन्तौ। साम्प्रतिके एव समये ला-पाज इत्यत्र उद्घाटित: भारतीयदूतावास: भारत-बोलीविया-देशयो: गहनसंकल्पं प्रदर्शयति इति जयशङ्कर: अवोचत्।

भाजपेतिदलम्

भारतीय-जनतापार्टीतिदलेन स्वलोकसभा-सदस्या: व्हिप इति निर्देशं प्रसारया अद्य निम्नसदने उपस्थितये निर्दिष्टा:। सूत्रानुसारेण व्हिपइति निर्देश: एतदर्थ प्रख्यापित: यतो हि सदने केन्द्रीयार्थसङ्कल्पनापत्रस्य सम्बन्धे विभिन्नमन्त्रालयानाम् अनुदानाभ्यर्थनेषु गिलोटिन-इत्येतस्य वित्तीय कार्याचरणस्य द्रुतगत्या कार्यं कर्तुं योजनास्ति इति।

अन्ताराष्ट्रियोलम्पिकसमिति: अध्यक्ष:

जिम्बाब्वेदेशीया कर्स्टी-कोवेन्ट्री-इत्येषा-अन्ताराष्ट्रियोलम्पिकसमित्या: आईओसी इत्येतस्या: अध्यक्षा चिता। इतिहासे प्रथमा महिलाध्यक्षा निर्वाचिता। एकचत्वारिंशत्वर्षीया एषा महिला ह्य: ग्रीस इत्येतस्य कोस्टानवारिनो इत्यत्र चतुश्चत्वारिंशदधिकैकशततमे आईओसी इत्येतस्मिन् सत्रे निर्वाचिता। अत्रावधौ अन्ताराष्ट्रिय-क्रिकेट्-परिषद: अध्यक्ष: जयशाह: क्रिस्टी कोवेन्ट्री इत्यस्यै शुभकामना: प्रदत्तवान्।

शाहः - नक्सलवादिनः

केन्द्रीयगृहमन्त्री अमितशाहः प्रावोचत् यत् नरेन्द्रमोदिप्रशासनं नक्सलवादिनः विरुध्य निर्मम-पद्धत्या सह अग्रे गच्छदस्ति। श्रीशाहः उक्तवान् यत् प्रशासनं तेषाम् उग्रवादिनां विरुद्धं शून्य-सहिष्णुतायाः नीतिं स्वीकरोति। ये सर्वासु सुविधासु अपि शरणागताः नैव भवन्तीति। सामाजिकसन्देशपटले एकस्मिन् श्रीशाहः अलिखत् यत् अद्य देशस्य सैनिकैः नक्सल-मुक्त-भारताभियानस्य दिशि एका अन्यापि सफलता बृहत्तमाधिगता। श्रीशाहः अग्रे अवोचत् यत् आगामिनि वर्षे मार्चमासे एकत्रिंशद्दिनाङ्के देशोऽयं नक्सलमुक्तो भविष्यतीति।

छत्तीसगढ-माओवादिनः

छत्तीसगढ़राज्ये द्वयोः भिन्न-घटनयोः त्रिंशत्-माओवादिनः मारिताः। माओवादिभिः सह सङ्घर्षे जनपदारक्षितारक्षिबलस्य एकः आरक्षकः अपि वीरगतिं प्राप्तवान्।

बैडमिण्टन्-क्रीडा

बैडमिण्टनक्रीडायां, भारतस्य शङ्कर-सुब्रहमण्यम् इत्येषः स्विट्जरलैण्डदेशस्य बाजलनगरे स्विस-ओपन-चैम्पियनशिप-प्रतिस्पर्धायाः पुरुषैकलवर्गीये प्रागुपान्त्यचक्रे प्रविष्टः। तदनु अद्य तस्य प्रागुपान्त्यचक्रे सामुख्यं फ्रांसदेशीयेन क्रिस्टो-पोपोव-इत्यमुना साकं भविष्यति। महिलायुगलप्रतियोगितायां भारतस्य ट्रीसाजॉली-गायत्रीगोपीचन्द-इत्येते अपि प्रागुपान्त्यचक्रे प्रविष्टवत्यौ।

।। इति वार्ताः।।